# श्री दुर्गाद्वात्रिंशन्नामावली

दुर्गा दुर्गार्तिशमनी दुर्गाऽऽपद्विनिवारिणी ।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥ 1

दुर्गतोद्धारिणी दुर्गनिहंत्री दुर्गमापहा ।
दुर्गमज्ञानदा दुर्गदैत्यलोकदवानला ॥ 2

दुर्गमा दुर्गमालोका दुर्गमाऽऽत्मस्वरूपिणी ।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता ॥ 3

दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिनी ।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी ॥ 4

दुर्गमासुरसंहंत्री दुर्गमायुधधारिणी ।
दुर्गमांगी दुर्गमाता दुर्गम्या दुर्गमेश्वरी ॥ 5

दुर्गभीमा दुर्गभामा दुर्गभा दुर्गधारिणी ।
नामावलिमिमां यस्तु दुर्गाया मम मानवः ॥ 6

पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः ।
शत्रुभिः पीड्यमानो वा दुर्गबंधगतोऽपि वा ।
द्वात्रिंशन्नामपाठेन मुच्यते नात्र संशयः ॥ 7

॥ इति श्री दुर्गाद्वात्रिंशन्नामावली स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam